309sk23

# 23

# हृदय–परिवर्तनम्

संसारे सज्जनाः अपि भवन्ति दुर्जनाश्चापि। दुर्जनास्तु प्रायः परपीडायाम् आनन्दम् अनुभवन्ति। परम् एतादृशाः अपि प्रसङ्गाः उपलभ्यन्ते यत्र सज्जनानां महापुरुषाणां संगत्या तेषाम् दुष्टानाम् हृदयपरिवर्तनम् जातम्, ते कुमार्गं त्यक्त्वा सत्पथगामिनः अभवन्। अस्मिन 'हृदयपरिवर्तनम्' इति नाट्यांशेऽपि वयं पठामः यत् भगवतः बोधिसत्त्वस्य जन्मान्तरे अद्भुतबलिदानं दृष्ट्वा दुष्टाः राक्षसाः कथं क्रूरतां त्यक्त्वा सहृदयाः जाताः इति।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'हृदयपरिवर्तनंम्' इति नाट्यांशस्य अभिनयं कर्तुं शक्ष्यति;
- राज्ञः मैत्रबलस्य चरित्रचित्रणं करिष्यति;
- मैत्रबलस्य त्यागभावनायाः उल्लेखं करिष्यति;
- अहिंसायाः महत्त्वं लेखिष्यति;
- समस्तपदानाम् विशेषतः बहुव्रीहिसमासस्य विग्रहं करिष्यति;
- 'तव्यत्' प्रत्ययस्य त्रिषु लिङ्गेषु प्रयोगं करिष्यति;
- दा, धा धात्वोः रूपाणि प्रयोक्तुं समर्थः भविष्यति।

## क्रियाकलापः



23.1



23.2



23.3

उपरिदत्तानि चित्राणि दृष्ट्वा मञ्जूषायां प्रदत्तैः वाक्यैः अधोलिखितां कथां पूरयत–

एकः अङ्गुलिमाल नामकः लुण्ठकः आसीत्। सः नवनवतिः अङ्गुलीनां मालाम् धारयति स्म। सः अङ्गुलीनां शतकं धारयितुं कृतप्रतिज्ञः आसीत्। सः लुण्ठकः एकदा गच्छन्तं बुद्धम् उच्चैः उच्चार्य कथयति 1.................... ...................। मम मालायां शतमा अङ्गुली तवैव भविष्यति। 2.................. परं 3...................... इति बुद्धः पृच्छति। अहं भवतः साहसं दृष्ट्वा 4..................... । तदा महात्मा बुद्धः उपदिशति 5.................. ...................., 6.................. ।

| **मञ्जूषा** |
|---|
| अहं तु स्थितः अस्मि, तिष्ठ अग्रे मा गच्छ। त्वं कदा विरतः भविष्यसि? प्राणिवधं त्यज, नतमस्तकः अस्मि, अहिंसा परमो धर्मः। |

## 23.1 मूलपाठः

### हृदय–परिवर्तनम्

सर्वप्रथमं पठनात् पूर्वम् अत्र वयं पात्राणां परिचयं प्राप्नुमः।

**मैत्रबलः** –राजा

**पञ्चयक्षाः**–रूष्टेन यक्षेश्वरेण स्वराज्यात् निष्कासिताः अपराधिनः, ब्राह्मणवेषधारिणः यक्षाः।

**गोपालकः**– राज्ञः मैत्रबलस्य राज्ये एकः वंशीवादकः।

**मन्त्री** –राज्ञः मैत्रबलस्य एकः मन्त्री।

इदानीम् मूलपाठं पठामः।

(स्थानम् – घोरम् अरण्यम्)

(समयः – प्रातर्वेला)

(ततः प्रविशन्ति धृतब्राह्मणवेशाः पञ्च यक्षाः)

**प्रथमः** – अहो श्वापदभूयिष्ठोऽयं वनप्रदेशः। अत्र तु रविकिरणाः अपि आशङ्किताः इव प्रविशन्ति।

**द्वितीयः** – सत्यं वदसि। अत्र सम्प्राप्ता वयं स्वैरं विहर्तुं प्रभविष्यामः। मैत्रबलस्य राज्ये तु प्राणधारणम् अपि दुष्करं जातम् भोजनाभावात्।

**तृतीयः** – (उच्चैः प्रहसन्) शाकभोजिनां मध्ये कुतोऽस्माकं पिशिताशनानां जीवन–निर्वाहः?

**चतुर्थः** – अस्माकम् अपराधेनैव रुष्टेन यक्षेश्वरेण वयं स्वराज्यात् निर्वासिताः।

**पञ्चमः** – किं वृथा चिन्तनेन? अत्रैव वने स्वेच्छया विहरिष्यामः।

(सहसा वंशीध्वनिः गुञ्जति)

**सर्वेयक्षाः** – कुतोऽस्मिन् घोरे विपिने संगीतकम्? कोऽयम् वंशीवादकः? एत, एत पश्यामः। ध्वनिम् अनुसरन्तो यामः।

**प्रथमः** – तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति।

**द्वितीयः** – अहो, ज्ञायतेऽधुना यत्रैता गावो विचरन्ति, तत्समीपे एव तेन मुरलीवादकेन भवितव्यम्।

**तृतीयः यक्षः**– पश्यत, पश्यत वटतरुतले निषण्णः कश्चिद् युवा वंशीं ध्वनति। तमुपसर्पामः।

**शब्दार्थः**

घोरम् = भयंकर
अरण्यम = जंगल
प्रातवेला = सुबह का समय
धृतब्राह्मणवेशः = ब्राह्मण का वेष धारण किए हुए
श्वापदभूयिष्ठः = अनेक पशुओं से युक्त
स्वैरम् = स्वेच्छापूर्वक
विहर्तुं प्रभविष्यामः = विहार कर सकेंगे
दुष्करंजातम् = कठिन हो गया है
प्रहसन् = हंसते हुए
शाकभोजिना = साग खाने वालों के
पिशिताशनानां = कच्चा मांस खाने वालों का
रुष्टेन = नाराज हुए
निर्वासिताः = निकाल दिए गए हैं
वृथा = व्यर्थ ही
विहरिष्यामः = विहार करेंगे
वंशीध्वनिः = बांसुरी की आवाज
गु×जति = गूंजती है
विपिने = जंगल में
वंशीवादकः = बांसुरी बजाने वाला
यामः = जाते हैं
तर्कयामि = सोचता हूँ
वादयति = बजा रहा है
अधुना = अब
ज्ञायते = पता चला है



23.4



टिप्पणी

## द्वितीयं दृश्यम्

(ततः प्रविशति यथा निर्दिष्टकर्मा गोपालकः)

**गोपालकः** – (ब्राह्मणवेशान् यक्षान् विलोक्य)

स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

**यक्षाः** – अरण्यदर्शनोत्सुकाः वयम् इहागताः स्मः। परं त्वम् एकाकी विचरन्, वंशीं च वादयन् भीतिं न अनुभवसि।

**गोपालकः** – कुतो भीतिः? भगवति बोधिसत्वे मैत्रीबले राज्यं शासति सर्वाः प्रजाः निर्भयाः सन्ति। कश्चित् कमपि पीडयितुं न प्रभवति।

**यक्षाः** – किम् राक्षसाः अपि?

**गोपालकः** – अथ किम्। यदि कौतूहलं, श्रूयताम्।

सर्वप्राणिषु धृतमैत्रीभावो मैत्रबलो हि जितेन्द्रियगणः, करुणापरिपूर्णमनाः, अहिंसायां च प्रतिष्ठितो वर्तते। मैत्री एव तस्य राज्ञः बलम्। क्रोधं तु स जानाति एव न। सैन्यसंगठनम् आचाररक्षणार्थमेव। तस्य महास्वस्त्ययनेन परिरक्षितं प्रजाजनम् अकारणद्वेषपराः यक्षराक्षसाः अपि हिंसितुं न प्रभवन्ति। मृदुभाषी सः, सम्यक् च पृथ्वीं पालयति।

**यक्षाः** – यथार्थं स्यात् त्वदीयं कथनम्। अस्तु, त्वमत्र धेनूश्चारय, वंशीं च वादय वयमग्रे गच्छामः। (सर्वे निष्क्रान्ताः)

## तृतीयं दृश्यम्

(स्थानम्– राजसभा। समयः अपराह्नवेला। भूपतिः सिंहासनम–धितिष्ठति,।

(द्वारपालः प्रविश्य)

गावः = गौएं
मुरलीवादकेन भीवतव्यम् = मुरली बजाने वाला होगा
पश्यत = देखो
निषण्णः = बैठा हुआ
युवा = नौजवान
तमुपसर्पामः = उसके पास जाते हैं
यथानिर्दिष्टकर्मा = जैसा निर्देश दिया गया है वैसे ही कार्य करते हुए
समायाताः = आए हैं
अरण्यदर्शनोत्सुकः = जंगल देखने की उत्सुकता से
एकाकी = अकेले
भीतिम् = भय को
राज्यंशासति = राज्य पर शासन करने पर
पीडयितुं न प्रभवति = तंग नहीं कर सकता
धृतमैत्रीभावः = मित्रता का भाव धारण किए हुए
श्रूयताम् = सुनिए
करुणापरिपूर्णमनाः = करुणा से जिसका मन भरा हुआ है
अहिंसायां प्रतिष्ठितः = किसी को न मारने में लगा हुआ
स्वस्त्ययनेन = रक्षक से
अकारणद्वेषपराः = बिना कारण द्वेष से युक्त
सम्यक् = अच्छी तरह से
यथार्थः = सच
त्वदीयं = तुम्हारा
धेनूः = गायों को
निष्क्रान्ताः = निकल जाते हैं
अपराह्णवेला = दोपहर का समय

**द्वारपालः** – जयतु महाराजः। केचन ब्राह्मणवेशाः पञ्च पथिकाः भोजनेच्छया द्वारदेशे तिष्ठन्ति।

**मैत्रबलः** – किम् अतिथयः। भोजनेच्छया बहिः तिष्ठन्ति सादरम् प्रवेशय।

(राजसभां प्रविश्य)

**एकः ब्राह्मणः**– महाराजो विजयताम्। दूरात् सम्प्राप्ताः वयम् क्षुधया पिपासया च पीडिताः स्मः। युष्माकं गुणगणख्यातिम् औदार्यं च निशम्य इह समागताः।

**मैत्रबलः** – अतिथीनां सेवा अस्माकं धर्मः। यथेच्छं भोज्यं पेयं च लप्स्यध्वे। (मन्त्रिणं प्रति) मन्त्रिवर। एतेषां भोजनादिकस्य व्यवस्था क्रियताम्।

**मन्त्री** – यथाज्ञापयति देवः।

(निष्क्रम्य पुनः प्रविश्य)

देव! भोजनम् आनीतम्।

**ब्राह्मणाः** – (राजोचितं विविधं भोजनं दृष्ट्वा) वयम् नैतद् भक्षयिष्यामः। वयं यक्षाः। मांसं रुधिरमेव अस्माकं प्रियं भोजनम्। तदेव उपनीयताम्।

(सहसा ते दीर्घाकारं विकरालं रूपं धारयन्ति)

**राजा** – आत्मगतम्। सम्प्रति किं करवाणि? एतेषां भोजनार्थे अन्येषां जीवानाम् हिंसा भविष्यति। न मे रोचते जीवहिंसा। (क्षणं विचिन्त्य) भवतु, दृष्टः उपायः। अहं स्वदेहस्य मांसेन एतान् तर्पयामि। (प्रकाशम्) मन्त्रिवर! अमूनि मांसानि शोणितानि च लोकस्य हितार्थमेव धृतानि। अद्य यदि तेषाम् उपयोगः अतिथिकृते भवेत् तत् तु मम सौभाग्यम् अस्ति। अतः अहं स्वशरीरेण आतिथ्यं कर्त्तुमिच्छामि।

अधितिष्ठति = बैठता है
प्रविश्य = प्रवेश करके
प्रवेशय = प्रवेश कराओ
विजयतम् = जय हो
क्षुधया = भूख से
पिपासया = प्यास से
ख्यातिम् = प्रसिद्धि को
निशम्य = सुनकर
भोज्यम् = खाने योग्य
पेयम् = पीने योग्य
निष्क्रम्य = निकलकर
उपनीयताम् = लाइए
दीर्घाकारम् = लम्बे आकार वाले
विकरालं रूपं = भयंकर रूप को
सम्प्रति = अब
मे = मुझे
जीवहिंसा = प्राणियों का विनाश
क्षणम् = थोड़ी देर
विचिन्त्य = सोचकर
तर्पयामि = तृप्त करता हूँ
अमूनि = ये
शोणितानि = रक्त
धृतानि = धारण किए गए हैं
आतिथ्यम् = अतिथि सत्कार
अनवेक्षितुम् = उपेक्षा करने के लिए
प्रदानहर्षातिशयात् = दान देने के लिए हर्षातिरेक में (अत्यधिक खुशी में) संविद्यमानम् = वस्तु के मौजूद रहने पर, विस्पष्टम् = साफ साफ
याचितः = मांगने पर
सिराः = नाड़ियां, धमनियां
मोचयितुम् = हटाने के लिए
निशितम् = तीखे
निर्स्त्रिशम् = शस्त्र, तलवार का
मांसच्छेदवेदनाभिः = मांस काटने की पीड़ा से, विरम्यताम् = रुक जाइए
नः = हमारे, क्षमस्व = क्षमा करें
प्राणिहिंसाम् = प्राणियों के विनाश को, परद्रव्य लोभम् = दूसरे के धन के प्रति लालच को
विषवत् = जहर की तरह
त्यजन्तु = छोड़ दें
प्रतिजानीमः = प्रतिज्ञा करते हैं
स्प्रक्ष्यामः = छुएंगे
अन्तर्हिता भवन्ति = छिप जाते हैं
दैवकृपया = ईश्वर की कृपा से
अक्षतदेहः = स्वस्थ शरीर वाला





**मन्त्री** – नार्हति देवः प्रदानहर्षातिशयात् अनुरक्तानाम् प्रजानां हिताहितम् अनवेक्षितुम्। अपि च पञ्चानाम् एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

**राजा** – श्रूयताम्

संविद्यमानं नास्तीति ब्रूयादस्मद्विधः कथम्।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः।।1।।

तन्न मां वारयितुमर्हन्त्यत्र भवन्तः। वैद्याः आहूयन्ताम् पञ्चसिराः मोचयितुम्। (वैद्यैः तथा कृते सति राजा स्वयं निशितं निस्त्रिंशमादाय स्वमांसानि छित्त्वा तेभ्यः प्रयच्छति)

**यक्षाः** – (आत्मगतम्) अहो विचित्रोऽयं नृपः। मांसच्छेदवेदनाभिः अकम्पमानः प्रसन्नवदनः विराजते। (प्रकाशम्) अलमलं देव विरम्यताम् स्वशरीरपीडाप्रसंगात्। यद्यपि तवायमुद्यमः लोकहितायैव तथापि अज्ञानवशात् स्वहितमपि अपश्यद्भिः यद् अस्माभिः एवं पीडितः भवान् तदर्थं क्षमस्व नः अपराधम्। (राज्ञः पादयोः पतन्ति)

**राजाः** – यदि भवन्तः अस्मत्प्रियमिच्छन्ति तर्हि अस्मात् क्षणात् प्राणिहिंसाम्, परद्रव्यलोभम्, मद्यपानं निन्दितवचनानि च विषवत् त्यजन्तु।

**यक्षाः** – प्रतिजानीमः वयम्। न पुनः कदापि मांसम् स्प्रक्ष्यामः। (यक्षाः प्रणम्य प्रदक्षिणां च कृत्वा अन्तर्हिताः भवन्ति)

(आकाशः दुन्दुभिध्वनिना पूरितः। पुष्पवृष्टिः भवति। दैवकृपया मैत्रबलः राजा अक्षतदेहः विराजते।

## 23.2 बोधप्रश्नाः

1. वाक्यांशान् मेलयत

| खण्डः 'क' | खण्डः 'ख' |
|---|---|
| (क) कुतोऽस्मिन् घोरे | (i) वनप्रदेशः |
| (ख) भगवति बोधिसत्त्वे मैत्रबले राज्यं शासति | (ii) औदार्यं च निशम्य इह |
| (ग) श्वापदभूयिष्ठोऽयम् | (iii) अकम्पमानः प्रसन्नवदनः |
| (घ) युष्माकं गुणगणख्यातिम् | (iv) सर्वाः प्रजाः निर्भयाः सन्ति |
| (ङ) मांसच्छेदवेदनाभिः | (v) विपिने संगीतकम् |

2. पाठं पठित्वा रिक्तस्थानानि पूरयत

अत्र तु रविकिरणाः अपि (i) ........... इव प्रविशन्ति। त्वमेकाकी (ii) ........... वंशीं च वादयन् (iii) ........... नानुभवसि। (iv) ........... सेवा अस्माकं धर्मः। वैद्याः (v) ........... सिराः मोचयितुम्। न पुनः कदापि मांसं (vi) ...........

3. एतेषां कथनानां कः कः वक्ता?

(क) अस्माकं अपराधेनैव रुष्टेन यक्षेश्वरेण वयं स्वराज्यात् निर्वासिताः।

(ख) तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति।

(ग) स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

(घ) किं राक्षसाः अपि?

(ङ) अतिथीनां सेवा अस्माकं धर्मः।

---

## 23.3 अधुना अवगच्छामः

### प्रथमः अंशः

**स्थानम् घोरम् अरण्यम् ........................................................ तमुपसर्पामः।**

इदानीं जानीमः च यत् कथं वने पञ्च यक्षाः ब्राह्मणवेशे भ्रमन्ति, एकं वंशीवादकं च पश्यन्ति।

किं भवन्तः जानन्ति यत् महात्मनः बुद्धस्य 'बोधिसत्त्वः' इति अपरं नाम अपि अस्ति? आम् बोधिसत्त्वः इति नाम तु तस्य बौद्धसन्यासिनः भवति यः पूर्णज्ञानस्य उपलब्धेः मार्गे अग्रसरः वर्तते। सः पूर्णबुद्धत्वं प्राप्य जन्म–मरण–दुःखबन्धनात् मुक्तिं (मोक्षं) प्राप्नोति।

बोधिसत्त्वस्य पूर्वजन्मनाम् अनेकाः कथाः विद्यन्ते। बोधिसत्त्वः 'महात्मा बुद्धः' इति नाम्ना प्रसिद्धोऽभूत्। तस्य पूर्वजन्मनां कथाः अपि भवद्भिः श्रुताः पठिताः अपि। ताः कथाः 'जातककथा' इति कथ्यन्ते। एतासां कथानां संग्रहः 'जातकमाला' इति ग्रंथे अस्ति।

बोधिसत्त्वः 'मैत्रबल' इति नाम्ना प्रसिद्धः नृपः आसीत्। तस्य अहिंसाभावेन यक्षाणां हृदयपरिवर्तनं जातम्। तेन च यक्षाः हिंस्रभावं त्यक्तवन्तः।

**(1) अहो, श्वापदभूयिष्ठोऽयं वनप्रदेशः**

यक्षाः देवयोनिविशेषस्य प्राणिनः भवन्ति। ते धन–संपत्तेः प्रभोः कुबेरस्य सेवकाः सन्ति तस्य कोषं च रक्षन्ति।

भवद्भिः श्रुतम् यत् यक्षाणां निवासः गहने निर्जने वनप्रदेशे भवति। इदं वनम् इयत् सघनम् अस्ति यत्र सूर्यकिरणानां प्रवेशः अपि काठिन्येन भवति। अत्र वन्यपशूनां व्याघ्रादीनां बहुलता वर्तते। यक्षाणां भोजनम् अपि मांसं शोणितादिकं एव भवति। ते पञ्चसंख्याकाः यक्षाः तत्र निर्जनं वनं प्राप्य अति मोदन्ते। ते तत्र स्वेच्छया भ्रमित्वा किमपि अभीष्टं





मांसादिकं च हिंसया प्राप्तुं प्रभवन्ति। अत एव अत्र 'अहो! इति शब्दः तेषां साश्चर्यसुखभावं द्योतयति।

**(2) सर्वप्राणिषु धृतमैत्रीभावो ........................ च प्रतिष्ठितो वर्तते**

गोपालकः मैत्रबलस्य गुणान् वर्णयन् यक्षान् प्रति कथयति यत् मैत्रबलेन इन्द्रियेषु विजयः प्राप्तः। दीनजनान् प्रति तस्य हृदये करुणायाः भावः अस्ति। तस्य मनसि वचसि कर्मणि च जीवहिंसायाः भावः सर्वथा नास्ति, अतः तस्य जीवने अहिंसा प्रतिष्ठिता वर्तते। अन्येऽपि बहवः अहिंसकाः राजानः महापुरुषाः प्रसिद्धाः सन्ति। किं तेषां विषये भवद्भिः पठितम् श्रुतम् वा? आम्, यथा शिवि अशोकः, महात्मागांधी आदयः।

**(3) अस्माकं अपराधैनैव ............................... स्वराज्यात् निर्वासिताः**

वने एकः यक्षः अन्यान् यक्षान् प्रति वदति यत् अस्माभिः जनानाम् ओजांसि हर्त्तुम् अपराधः कृतः, येन अस्माकं यक्षाधिपतिः कुबेरः रुष्टः जातः। स च अस्मान् दण्डरूपेण राज्यात् बहिः निष्कासितवान्। इदं तु सर्वविदितं यत् हिंसकानां कृते अद्यापि दण्डव्यवस्था अस्ति। प्राचीनकाले राज्यात् निष्कासनम् दंडस्य एकः प्रकारः आसीत्। अद्यत्वे हिंसकानां कृते कीदृशाः दंडाः सन्ति? इति विचारयन्तु।

**सारः**

ब्राह्मणवेशधारिणः पञ्च यक्षाः बुभुक्षिताः पिपासिताः च मैत्रबलनाम्नः राज्ञः राज्ये विचरन्ति। तेषु एकः स्वागमनकारणम् अपराधे कृते यक्षाधिपतिना राज्यनिःसारणं कथयति। तत्रैव वने ते केनापि गोपालकेन वादितं वंशीध्वनिम् शृण्वन्ति। समीपे एव गावः विचरन्ति स्म तेन तैः अनुमितं यत् वंशीवादकः गवां समीपे एव भवेत्। किंचित् कालानन्तरं तृतीयः यक्षः सर्वान् आह्वयति पश्यत, पश्यत, वटवृक्षस्य मूले कोऽपि युवा वंशीं वादयति। तत्पार्श्वे एव चलामः।

ब्राह्मण का वेश धारण किए हुए पाँचों यक्ष भूखे प्यासे मैत्रबल के राज्य में घूम रहे हैं। उनमें से एक अपने आने का कारण अपराध किए जाने पर यक्षाधिपति द्वारा राज्य से बाहर निकाला जाना बताता है। वहीं वन में उन्हें किसी ग्वाले द्वारा बजाई गई वंशी की ध्वनि सुनाई देती है। वहाँ गौएं घूम रही हैं, जिनसे वे अनुमान लगाते हैं कि वंशी वादक गायों के आस पास होना चाहिए। थोड़ी देर बाद तीसरा यक्ष सभी को बुलाता है– देखो, देखो, वट वृक्ष के नीचे कोई युवक बंशी बजा रहा है, चलो उसी के पास चलते हैं।

## व्याकरणबिन्दवः

अधः रेखांकितपदेषु बहुव्रीहिसमासस्य तत्पुरुषसमासस्य च विग्रहं ध्यानेन पश्यन्तु।

(i) धृतब्राह्मणवेशाः यक्षाः प्रविशन्ति–धृतः ब्राह्मणस्य वेशः यैः, ते (यक्षस्य विशेषणम्)

(ii) कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः– पिशितम् अशनम् येषाम्, तेषाम् (अस्माकम् इत्यस्य विशेः)

(iii) भोजनाभावात् प्राणधारणमपि दुष्करं जातम्–भोजनस्य अभावात्।

(iv) वंशीध्वनिः गुञ्जति। वंश्याः ध्वनिः

अत्र वयं पश्यामः यत् बहुव्रीहिसमासे अन्यपदस्य प्रधानता अस्ति तस्मै च अर्थानुसारम् 'तत्' सर्वनाम प्रयुज्यते। यथा प्रथमे उदाहरणे 'ते' सर्वनाम यक्षेभ्यः प्रयुक्तम्। तत्पुरुष समासे च उत्तरपदं प्रधानं भवति। यथा भोजनस्य अभावात् इत्यत्र अभावात् इत्यस्य प्रधानता अस्ति।

**तव्यत्–प्रत्ययस्य प्रयोगः**

(i) तेन मुरलीवादकेन भवितव्यम्।

तव्यत्– प्रत्यये कर्तृपदं तृतीयाविभक्तौ कर्मपदं प्रथमाविभक्तेः क्रिया च कर्मानुसारं भवति। यदि वाक्ये कर्म नास्ति (यथा उपरि दत्ते उदाहरणे अस्ति) तदा क्रिया सदा नपुंसकलिंगे एकवचने आगच्छति। (यथा अत्र भवितव्यम् इति एकवचने अस्ति।)

(ii) त्वया नित्यं पाठः स्मर्तव्यः।

(iii) अस्माभिः नित्यम् प्रातः गीता पठितव्या।

एतेन भवद्भिः किं ज्ञातम्? आम् तव्यत्प्रत्ययः धातोः भवति। तव्यत् प्रत्ययान्तं पदं विशेषणं भवति।

| कर्तृपदे | पुल्लिंगे | नपुंसकलिंगे | स्त्रीलिंगे रूपाणि |
|---|---|---|---|
| | देववत् | फलवत् | लतावत् |
| | (पठितव्यः) | (पठितव्यम्) | (पठितव्या) |

विविधप्रत्ययाः उपसर्गाः च – अत्र क्त, तुमुन् शतृ प्रत्ययानां प्रयोगः अस्ति। एतेषां प्रत्ययानां प्रयोगस्य विषये भवद्भिः पूर्वपाठेषु पठितम्। अत्र प्रकृति प्रत्यय–प्रयोगस्य अभ्यासं कुर्मः।

| | | | |
|---|---|---|---|
| सम्प्राप्ताः | सम् + प्र | + आप् | + क्त प्रत्ययः |
| विहर्तुम् | वि + √हृ | | + तुमुन् प्रत्ययः (अव्य.) |
| प्रहसन् | प्र + √हस् | | + शतृ प्रत्ययः (पु.) |
| निर्वासितः | निर् + √विस् | + णिच् | + क्त प्रत्ययः (पु.) |
| अनुसरन्तः | अनु + √सृ | | + शतृ प्रत्ययः (पु.) |
| निषण्णः | नि + √सद् | | + क्त प्रत्ययः (पु.) |

## पाठगतप्रश्नाः 23.1

1. एकपदेन उत्तरत्
   (क) यक्षाः कीदृशवेषाः आसन्?
   (ख) अयम् वनप्रदेशः कीदृशः?
   (ग) कासाम् समीपम् मुरलीवादकेन भवितव्यम्?
   (घ) कुत्र निषण्णः युवा वंशीं वादयति स्म?
   (ङ) केषाम् मध्ये पिशिताशनानां जीवननिर्वाहः कठिनः जातः?

2. विशेषण–विशेष्यस्य मेलनं क्रियताम्

| | |
|---|---|
| (क) घोरम् | (i) वनप्रदेशः |
| (ख) रुष्टेन | (ii) विपिने |
| (ग) अयम् | (iii) मुरलीवादकेन |
| (घ) घोरे | (iv) यक्षेश्वरेण |
| (ङ) तेन | (v) अरण्यम् |

3. अत्र पदानाम् सत्यम् अर्थम् (✓) इति चिह्नेन, असत्यं तु (×) इति चिह्नेन स्पष्टीकुरुत

| | | |
|---|---|---|
| (क) अरण्यम् | = | विपिनम् / स्वैरम् |
| (ख) गावः | = | गोपालकाः / धेनवः |
| (ग) रविः | = | यक्षः / सूर्यः |
| (घ) दुष्करम् | = | कठिनम् / सुकरम् |
| (ङ) भूयिष्ठः | = | स्थिरः / बहवः |
| (च) वेला | = | समयः / विल्ववृक्षः |

## द्वितीयः अंशः

**ततः प्रविशति यथा निर्दिष्टकर्मा ............ वयमग्रे गच्छामः, सर्वे निष्क्रान्ताः।**

अधुना नाटकस्य द्वितीयांशं बोधामः जानीमः च कथम् गोपालकः वने स्वनिर्भीकतां यक्षान् प्रति वर्णयति–

**(i) कुतो भीतिः? भगवति बोधिसत्त्वे ................. निर्भयाः सन्ति।**

यक्षः वंशीं वादयन्तं युवानं पृच्छति यत् सः धोरे अरण्ये एकाकी विचरन् वंशीं च वादयन् कथं न विभेति? तदा गोपालकः वदति "अत्र पूर्वजन्मनि बुद्धः अस्मिन् जन्मनि मैत्रबलः राजा शासनं करोति। सः धृतमैत्रीभावः, अहिंसायां च प्रतिष्ठितः, क्रोधम् कदापि न

टिप्पणी

धर्मार्थकाममोक्षाणामारोग्यं
साधनं यतः।
तस्मादारोग्यदानेन
तद्दत्त स्याच्चतुष्टयम्।

करोति। सः मृदुभाषी राजा सम्यक् पृथ्वीं पालयति। अत्र तु सर्वाः प्रजाः निर्भयाः विचरन्ति। भयस्य स्थानमेव न अस्ति अत्र।

**(ii) मैत्री एव तस्य राज्ञः बलम् ....................... सम्यक् पृथ्वीं पालयति।**

गोपालकः राज्ञः मैत्रबलस्य गुणान् यक्षाणां समक्षं वर्णयति ''मित्रता तस्य राज्ञः मूलशक्तिः अतएव तस्य सार्थकं नाम अपि मैत्रबलः इति। सः सम्यक् जानाति यत् क्रोधात् एव विनाशः जायते अतः सः क्रोधहीनः निर्भयः चास्ति।

सः पृथ्वीं सम्यक् पालयति। सैन्यं तु राज्यव्यवहारार्थमेव। सः कदापि कठोरवचनं न वदति। इत्थं तस्य चरित्रम् आश्चर्यमयं, लोकोत्तरगुणयुक्तं च। एवंविधस्य राज्ञः राज्ये वयं प्रजाजनाः सुखिनः निर्भयाः च स्मः। तस्य मैत्रीभावबलात् राज्ये राक्षसाः अपि अहिंसकाः जाताः।

**(iii) यथार्थं स्यात् त्वदीयं कथनम् .......................... वयमग्रे गच्छामः।**

गोपालकस्य मुखात् राज्ञः मैत्रबलस्य गुणान् श्रुत्वा अपि यक्षाः तद्वचनेषु विश्वासं न कुर्वन्ति। संभवतः ते राज्ञः शीलं परीक्षितुम् इच्छन्ति। अत एव ते गोपालकं प्रति उपेक्षाभावं दर्शयन्तः कथयन्ति, ''त्वमत्र निश्चिन्तः सन् धेनूश्चारय वंशीं च वादय, वयम् तु अग्रे गच्छामः।

## व्याकरणबिन्दवः

अत्र प्रदत्तसन्धीनां विषये पूर्वपाठेषु पठितमेव। तेषाम् अत्र पुनः अभ्यासं कुर्मः।

**सन्धिच्छेदः**

| | | |
|---|---|---|
| स्वागतम् | = | सु + आगतम्, अ + आ = व–यण् सन्धिः |
| अरण्यदर्शनोत्सकाः | = | अरण्यदर्शन + उत्सुकाः, अ + उ = ओ गुणसन्धिः |
| इहागताः | = | इह + आगताः, अ + आ = आ, दीर्घसन्धिः |
| धेनूश्चारय | = | धेनूः + चारय (श्) चारय विसर्गः श्चुत्वसंधिः च |

**समस्तपदानां विग्रहः**– भवद्भिः बहुव्रीहि–तत्पुरुषसमासयोः विषये प्रथमांशे पठितम्। इदानीं तेषां पुनः अभ्यासं कुर्मः।

| | | | |
|---|---|---|---|
| धृतमैत्रीभावः | = | धृतः मैत्रीभावः येन सः, | बहुव्रीहिः |
| निर्भयाः | = | निर्गतं भयम् येभ्यः ते, | बहुव्रीहिः |
| जितेन्द्रियगणः | = | जिताः इन्द्रियाणां गणाः येन सः, | बहुव्रीहिः |
| करुणापरिपूर्णमनाः | = | करुणया परिपूर्णं मनः यस्य सः, | बहुव्रीहिः |
| सैन्यसंघटनम् | = | सैन्यानाम् संघटनम्, | षष्ठी तत्पुरुषः |
| सर्वप्राणिषु | = | सर्वेषु प्राणिषु | कर्मधारयः |
| मैत्रबलः | = | मैत्रस्य बलम् यस्मिन् सः, | बहुव्रीहिः |

**प्रत्ययप्रयोगः**– पूर्वपठित कृतप्रत्ययानाम् अत्र पुनः अभ्यासं कुर्मः।

विलोक्य = वि + लोक् + ल्यप् प्रत्ययः

परिरक्षितम् = परि + रक्ष् + क्त प्रत्ययः

हिंसितुम् = हिंस् + तुमुन् प्रत्ययः

निष्क्रान्ताः = निस् + क्रम् + क्त

विचरन् = वि + चर् + शतृ प्रत्ययः (पु.)

वादयन् = वद् + णिच् + शतृ प्रत्ययः (पु.)

भीतिः = भी + क्तिन् प्रत्ययः (ति) भावे अर्थे धातोः क्तिन् प्रत्ययो भवति। 'क्तिन्' प्रयोगे सति शब्दः नित्यस्त्रीलिङ्गः भवति।

**सारः**

यदा निर्जने वने गोपालकः ब्राह्मणवेषाणाम् यक्षाणाम् स्वागतम् करोति तदा ते वने तस्य निर्भीकतायाः कारणं पृच्छन्ति। सः कथयति यत् राज्ञि बोधिसत्त्वे मैत्रीबले राज्यं शासति, सर्वे जनाः निर्भयाः सन्ति। प्रजाजनम् अकारणं द्वेषपराः राक्षसाः अपि हिंसितुम् न प्रभवन्ति। राज्ञः गुणान् श्रुत्वा ते अग्रे गच्छन्ति।

ग्वाला ब्राह्मण वेशधारी यक्षों को देखकर उनका स्वागत करता है तब वे अकेले घूमते हुए चरवाहे से ''बंसी बजाते हुए तथा जंगल में अकेले घूमते हुए क्या तुझे डर नहीं लगता?'' यक्ष ऐसा प्रश्न पूछते हैं। ग्वाला कहता है कि, ''जब से भगवान बोधिसत्त्व राजा मैत्रबल के रूप में शासन कर रहे हैं, तभी से सारी प्रजा निडर है तथा कोई किसी को पीड़ित नहीं करता। मैत्रबल राजा जितेन्द्रिय है, दयालु तथा अहिंसक प्रवृत्ति का है। मैत्री ही उसका बल है, वह मृदुभाषी है, क्रोध नहीं करता। उसके राज्य में यक्ष–राक्षस भी हिंसा नहीं करते। वह भली प्रकार पृथ्वी का भरण–पोषण करता है।'' यक्ष उसकी बात का विश्वास नहीं करते और वहाँ से चले जाते हैं।

## पाठगतप्रश्नाः 23.2

1. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

यथा (क) मैत्री एव तस्य राज्ञः बलम्।

मैत्री एव कस्य राज्ञः बलम्?

(ख) सर्वप्राणिषु धृतमैत्रीभावो मैत्रबलो अहिंसायां प्रतिष्ठितः वर्तते।

(ग) यथार्थं स्यात् त्वदीयं कथनम्।

(घ) त्वमत्र वंशीं वादय।

(ङ) यदि कुतूहलं तदा युष्माभिः श्रूयताम्।

2. समस्तपदानि रचयत।

(क) धृतः मैत्रीभावः येन सः।

(ख) निर्गतं भयं येभ्यः ते।

(ग) जिताः इन्द्रियाणां गणाः येन सः।

(घ) मैत्री एव बलं यस्य सः।

3. कोष्ठकात् उचितं पदं चित्वा वाक्यानि पूरयत।

(क) राज्ञः ................ मैत्री एव आसीत्। (धनं, बलं)

(ख) त्वम् ....................... वादयन् भीतिं न अनुभवसि। (वंशीं, वीणां)

(ग) .................... स्यात् त्वदीयं कथनम्। (यथार्थं, मिथ्या)

(घ) .................... उत्सुकाः वयम् इहागताः। (नगरदर्शनाय, अरण्यदर्शनाय)

(ङ) मैत्रबले राज्यं शासति सर्वाः प्रजाः ....................। (भयभीताः, निर्भयाः)

## तृतीयः अंशः

**स्थानम्– राजसभा .................................................. अक्षतदेहः विराजते।**

इदानीं नाटकस्य अन्तिमे अंशे पठामः यत् बोधिसत्त्वः कथं स्वशरीरेण आतिथ्यं कर्त्तुम् इच्छति।

**(i) युष्माकं गुणगणख्यातिम् औदार्यं च निशम्य इह समागताः।**

क्षुधापिपासापीडिताः ब्राह्मणवेशाः यक्षाः भोजनं प्रार्थयमानाः राजानं वदन्ति यत् अस्माभिः भवतः दानशीलता–उदारता–करुणा–अंहिसादिगुणानां विषये लोकेभ्यः श्रुतम्। अतएव वयम् अत्र भोजनेच्छया आगताः स्मः। कस्यापि जनस्य गुणविशेषं श्रुत्वा तस्या दर्शनेच्छा भवति एव।

**(ii) अतिथीनां सेवा अस्माकं धर्मः।**

मैत्रबलः यक्षाणां प्रार्थनां श्रुत्वा कथयति यत् भोजनेच्छया प्राप्ताः यूयम् मम अतिथयः। वयम् अतिथीनां सेवां परमधर्मम् मन्यामहे। अतः अत्र इच्छानुसारम् यूयं भोजनं पेय–पदार्थान् च प्राप्स्यथ। अनेन मैत्रीबलस्य अतिथिसेवकरूपस्य परिचयं प्राप्यते।

**(iii) "अहम् स्वदेहस्य मांसेन एतान् तर्पयामि।"**

अकस्मात् ब्राह्मणान् अतिथीन् धृतयक्षरूपान् दृष्ट्वा तेषां मांसभोजनेच्छां च श्रुत्वा नृपः किंकर्त्तव्यविमूढः जायते। सः अहिंसकः अस्ति अतः अन्यान् जीवान् हत्वा कथमहम् एतेषां कामनां पूरयेयम् इति चिन्तयति। सहसा तस्य मनसि विचारः स्फुरति–"अहं निजशरीरस्य

मासं रक्तं च दत्त्वा एतान् अतिथीन् तोषयामि यतः न मे रोचते जीवहिंसा। प्रशंसनीयः तस्य अतिथिसेवाभावः अहिंसाभावः च।

**(iv) अपि च पञ्चानाम् एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।**

मन्त्री राज्ञे निवेदयति यत् एतेषां पञ्चानाम् यक्षाणाम् कृते भवतः शरीरस्य रक्तमांसदानेन प्राणहानिः सम्भाव्यते। एतादृशेन कृत्येन सकलराज्यस्य महती हानिः क्षतिः च भविष्यति। अतः यक्षाणाम् तोषणस्य एतादृशः विचारः त्यक्तव्यः।

**(v) यक्षाः (आत्मगतम्) अहो! विचित्रोऽयं नृपः वेदनाभिः अकम्पमानः प्रसन्न–वदनः विराजते।**

यदा मैत्रबलः छुरिकया स्वशरीरस्य कर्तनं करोति यक्षाः तस्य धैर्यम् साहसं च विलोक्य विस्मिताः भवन्ति। ते चिन्तयन्ति कीदृशोऽयं महासत्त्वः। शरीरच्छेदेऽपि वेदनया व्याकुलः न भवति। अपितु अस्य मुखे प्रसन्नता विराजते। नूनम् अयम् कोऽपि महापुरुषः एव।

**(vi) श्लोकः**

संविद्यमानं नास्तीति ब्रूयादस्मद्विधः कथम्।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः।।

**पदच्छेदः–** संवद्यिमानम् न अस्ति इति ब्रूयात् अस्मद्विधः कथम्
न दास्यामि इति असत्यम् वा विस्पष्टम् अपि याचितः।।

**अन्वयः–** संविद्यमानं न अस्ति इति अस्मद्विधः कथं ब्रूयात्? विस्पष्टम् अपि याचितः, न दास्यामि इति वा असत्यं वा कथम् ब्रूयात्?

**व्याख्या**

राजा मन्त्रिणं प्रति कथयति यत् अस्मादृशः सत्यप्रियः जनः वस्तुनि विद्यमानेऽपि मम समीपे नास्ति इति कथं वदेत्? अर्थात् यदि किमपि वस्तु सत्यवादिनः नरस्य पार्श्वे अस्ति तर्हि न अस्तीति असत्यं वक्तुम् सः न शक्नोति। यतः सत्यवक्ता असत्यं न भाषते। दानशीलः नरः याचितः सन् दानं करोति एव। अर्थात् किमपि कष्टं स्यात्; कापि हानिः स्यात्; प्राणाः प्रणष्टाः भवेयुः; परं स्वदानशीलतां दानी न त्यजति।

**सारः**

द्वारपालः राजानं सूचयति यत् द्वारे पञ्च पथिकाः भोजनेच्छया तिष्ठन्ति। राजा मन्त्रिणं तेभ्यः भोजनव्यवस्थां कर्त्तुम् आदिशति। किन्तु राजोचितं विविधं भोजनम् दृष्ट्वा ते एतत् न भक्षयन्ति। केवलं मांसरुधिरमेव तेषाम् भोजनम्। सहसा ते दीर्घाकारं विकरालं रूपम् धारयन्ति। राज्ञे जीवहिंसा न रोचते। अतः सः स्वशरीरेण आतिथ्यं कर्त्तुमिच्छति। वैद्यान्

आहूय नृपः स्वयं निशितेन अस्त्रेण स्वमांसानि छित्वा यक्षेभ्यः प्रयच्छति। यक्षाः चिन्तयन्ति यत् कथं विचित्रोऽयं नृपः यः मांसच्छेदवेदनाभिः अपि प्रसन्नमुखः अस्ति। ते क्षमायाचनां कुर्वन्ति, राज्ञः पादयोः च पतन्ति। राजा कथयति यत् यदि ते राज्ञः प्रियम् इच्छन्ति तर्हि प्राणिहिंसा, परद्रव्यलोभं, मद्यपानम्, निन्दावचनानि च विषवत् त्यजन्तु। यक्षाः सहर्षम् एवं कर्त्तुम् प्रतिजानन्ति। राजानम् प्रणभ्य तस्य प्रदक्षिणां च कृत्वा अन्तर्हिताः भवन्ति। दैवकृपया मैत्रबलः राजा अपि पूर्ववत् अक्षतदेहः जातः।

द्वारपाल राजा मैत्रबल को सूचित करता है कि ब्राह्मण वेशधारी पाँच यात्री भोजन की इच्छा से बाहर खड़े हैं। राजा उन्हें सादर अन्दर बुलाता है और मन्त्री को उनके लिए भोजन लाने का आदेश देता है। राजोचित भोजन देखकर वे पांचों यक्ष उठ खड़े होते हैं और कहते हैं, "हम ऐसा भोजन नहीं खाएंगे। मांस और रुधिर ही हमारा प्रिय भोजन है। हमारे लिए वही लाएं।" उसी समय वे राक्षसों की भांति अपना विकराल रूप धारण कर लेते है। तभी राजा मैत्रबल, जिसे जीवहिंसा बिल्कुल पसन्द नहीं, अपने शरीर का मांस देकर उन्हें तृप्त करने का निर्णय लेता है। मन्त्री उसे बहुत समझाते हैं कि वे कुछ धन देकर उन्हें विदा कर दें, लेकिन राजा वैद्यों को बुलाने का आदेश देता है वैद्यों के आते ही राजा स्वयं तीखे शस्त्र से अपना मांस काटकर खाने के लिए उन्हें परोसता है। तभी यक्षों की प्रतिक्रिया है कि यह राजा कितना विचित्र है। वे राजा को मांस काटने के लिए मना करते हैं। उनका हृदय बदल जाता है, वे दया से द्रवीभूत हो जाते हैं। राजा के पांव पर गिरकर क्षमायाचना करते हैं। राजा का उनसे कथन है कि यदि वे हम सब का प्रिय करना चाहते हैं तो प्राणियों की हिंसा, मद्यपान और निन्दित वचन जैसे कुकर्म विष की भाँति छोड़ दें। तभी वे राजा को वचन देते हैं कि फिर कभी मांस को छुएंगे भी नहीं। फिर यक्ष, राजा को प्रणाम कर, प्रदक्षिणा करके, अन्तर्ध्यान हो जाते हैं। आकाश में नगाड़े बजते हैं। फूलों की वृष्टि होती है। ईश्वर की कृपा से राजा मैत्रबल का शरीर पूर्णतया स्वस्थ हो जाता है।

## व्याकरणबिन्दवः

**प्रत्ययप्रयोगः–** भवद्भिः ल्यप्–क्त क्त्वा प्रत्ययानां प्रयोगः पूर्वपाठेषु पठितः एव। अत्र तदनुसृत्य प्रकृतिप्रत्ययः। योगस्य अभ्यासं कुर्मः।

प्रविश्य = प्र + विश् + ल्यप् प्रत्ययः

निशम्य = नि + शम् + ल्यप् प्रत्ययः

निष्क्रम्य = निस् + क्रम् + ल्यप् प्रत्ययः

दृष्ट्वा = दृश् + क्त्वा प्रत्ययः

विचिन्त्य = वि + चिन्त् + ल्यप् प्रत्ययः

आदाय = आ + दा + ल्यप् प्रत्ययः

छित्त्वा = छिद् + क्त्वा प्रत्ययः

प्रणम्य = प्र + नम् + ल्यप् प्रत्ययः

कृत्वा = कृ + क्त्वा प्रत्ययः

समागताः = सम् + आ + गम् + क्त प्रत्ययः पुं. प्रथमा बहुवचनम्।

आनीतम् = आ + नी + क्त प्रत्ययः नपुं. प्रथमा एकवचनम्।

दृष्टः = दृश् + क्त प्रत्ययः, पुं. प्रथमा एकवचनम्

अनुरक्तानाम् = अनु + रञ्ज् + क्त प्रत्ययः पुं. षष्ठी बहुवचनम्

याचितः = याच् + क्त प्रत्ययः पुं. प्रथमा एकवचनम्

विस्पष्टम् = वि + स्पश् + क्त प्रत्ययः नपुं. प्रथमा एकवचनम्

पूरितः = पूर् + क्त प्रत्ययः पुं. प्रथमा एकवचनम्

**समस्तपदानां विग्रहः**

| | | |
|---|---|---|
| अपश्यद्भिः | = न पश्यद्भिः, | नञ् तत्पुरुषः |
| अनवेक्षितुम् | = न अवेक्षितुम्, | नञ् तत्पुरुषः |
| प्राणिहिंसाम् | = प्राणिनाम् हिंसा ताम्, | षष्ठी तत्पुरुषः |
| निन्दितवचनानि | = निन्दितानि वचनानि, | कर्मधारयः |
| अक्षतदेहः | = अक्षतं देहं यस्य सः, | बहुव्रीहिः |
| मैत्रबलः | = मैत्रम् एव बलम् यस्य सः, | बहुव्रीहिः |
| महाराजः | = महान् असौ राजा, | कर्मधारयः |
| पंचपथिकाः | = पञ्च पथिकाः, | कर्मधारयः |
| अतिथयः | = न तिथिः येषाम् ते, | बहुव्रीहिः |
| यथेच्छम् | = इच्छाम् अनतिक्रम्य, | अव्ययीभावः |

**अव्ययप्रयोगः**– यः शब्दः सदा एकरूपे एव तिष्ठति अर्थात् यस्मिन् शब्दे विभक्ति–लिङ्ग–वचन दृष्ट्या किमपि परिवर्तनं न जायते सः शब्दः अव्ययम् कथ्यते।

(i) अतः अहम् स्वशरीरेण आतिथ्यं कर्त्तुम् इच्छामि।

(ii) निष्क्रम्य पुनः प्रविश्य।

(iii) किम् अतिथयः बहिः तिष्ठन्ति?

(iv) दूरात् सम्प्राप्ताः वयम्।

(v) युष्माकं औदार्यं निशम्य इह आगताः।

(vi) यथा आज्ञापयति देवः।

(vii) मांसरुधिरम् एव अस्माकं प्रियम् भोजनम्।

(viii) सम्प्रति किम् करवाणि।

(ix) क्षणम् विचिन्त्य।

(x) अद्य यदि तेषाम् उपयोगः भवेत् तत् तु मम सौभाग्यम्।

(xi) अपि च एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

(xii) वैद्ये तथा कृते सति।

(xiii) अहो! विचित्रोऽयम् नृपः।

(xiv) यद्यपि तवायमुद्यमः लोकहितायैव तथापि भवतः पीडा नोचिता।

(xv) यदि भवन्तः अस्मत्प्रियम् इच्छन्ति तर्हि च जीवहिंसां विषवत् त्यजत।

(xvi) न पुनः किमपि मांसं स्प्रक्ष्यामः।

## धातुरूपाणि

### दा (जुहोत्यादिगणतः) उभयपदी

#### परस्मैपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र0 पु0 | ददाति | दत्तः | ददति | दास्यति | दास्यतः | दास्यन्ति |
| म0 पु0 | ददासि | दत्थः | दत्थ | दास्यसि | दास्यथः | दास्यथ |
| उ0 पु0 | ददामि | दद्वः | दद्मः | दास्यामि | दास्यावः | दास्यामः |
| | लङ्लकारः | | | लोट्लकारः | | |
| प्र0 पु0 | अददात् | अदत्ताम् | अददुः | ददातु | दत्ताम् | ददतु |
| म0 पु0 | अददाः | अदत्तम् | अदत्त | देहि | दत्तम् | दत्त |
| उ0 पु0 | अददाम् | अदद्व | अदद्म | ददानि | ददाव | ददाम |

**विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र0 पु0 | दद्यात् | दद्याताम् | दद्युः |
| म0 पु0 | दद्याः | दद्यातम् | दद्यात |
| उ0 पु0 | दद्याम् | दद्याव | दद्याम |

#### दा–आत्मनेपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र0 पु0 | दत्ते | ददाते | ददते | दास्यते | दास्येते | दास्यन्ते |
| म0 पु0 | दत्से | दधाते | दद्ध्वे | दास्यसे | दास्येथे | दास्यध्वे |
| उ0 पु0 | ददे | दद्वहे | दद्महे | दास्ये | दास्यावहे | दास्यामहे |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र० पु० | अदत्त | अददाताम् | अददत | दत्ताम् | ददाताम् | ददताम् |
| म० पु० | अदत्थाः | अददाथाम् | अदद्ध्वम् | दत्स्व | ददाथाम् | दद्ध्वम् |
| उ० पु० | अददि | अदद्वहि | अदद्महि | ददै | ददावहै | ददामहै |

**विधिलिङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० पु० | ददीत | ददीयाताम् | ददीरन् |
| म० पु० | ददीयाः | ददीयाथाम् | ददीध्वम् |
| उ० पु० | ददीय | ददीवहि | ददीमहि |

## धा (जुहोत्यादिगणतः) उभयपदी

### परस्मैपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र० पु० | दधाति | धत्तः | दधति | धास्यति | धास्यतः | धास्यन्ति |
| म० पु० | दधासि | धत्थः | धत्थ | धास्यसि | धास्यथः | धास्यथ |
| उ० पु० | दधामि | दध्वः | दध्मः | धास्यामि | धास्यावः | धास्यामः |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| प्र० पु० | अदधात् | अधत्ताम् | अदधुः | दधातु | धत्ताम् | दधतु |
| म० पु० | अदधाः | अधत्तम् | अधत्त | धेहि | धत्तम् | धत्त |
| उ० पु० | अदधाम् | अदध्व | अदध्म | दधानि | दधाव | दधाम |

**विधिलङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० पु० | दध्यात् | दध्याताम् | दध्युः |
| म० पु० | दध्याः | दध्यातम् | दध्यात |
| उ० पु० | दध्याम् | दध्याव | दध्याम |

### धा आत्मनेपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र० पु० | धत्ते | दधाते | दधते | धास्यते | धास्येते | धास्यन्ते |
| म० पु० | धत्से | दधाथे | दद्ध्वे | धास्यसे | धास्येथे | धास्यध्वे |
| उ० पु० | दधे | दध्वहे | दध्महे | धास्ये | धास्यावहे | धास्यामहे |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| प्र० पु० | अधत्त | अदधताम् | अदधत | धत्ताम् | दधाताम् | दधताम् |
| म० पु० | अधत्थाः | अदधाथाम् | अधद्ध्वम् | धत्स्व | दधाथाम् | धद्ध्वम् |
| उ० पु० | अदधि | अदध्वहि | अदध्महि | दधै | दधावहै | दधामहै |

**विधिलङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र० पु० | दधीत | दधीयाताम् | दधीरन् |
| म० पु० | दधीथाः | दधीयाथाम् | दधीध्वम् |
| उ० पु० | दधीय | दधीवहि | दधीमहि |

## पाठगतप्रश्नाः 23.3

1. अधोलिखितेषु कथनेषु यत् कथनं सत्यं तत् (✓) इति चिह्नेन यत् असत्यं (×) इति चिह्नेन च निर्दिशत।

   (क) ब्राह्मणाः शाकाहारं भोजनम् इच्छन्ति स्म।

   (ख) सहसा यक्षब्राह्मणाः विकरालं रूपं धारयन्ति।

   (ग) मांसच्छेदनात् राजा कम्पमानः खिन्नवदनः जातः।

   (घ) यक्षाः मैत्रबलं प्राणिहिंसां त्यक्तुं कथयन्ति।

   (ङ) न पुनः कदापि मांसं स्प्रक्ष्यामः इति यक्षाः राजानं प्रतिजानन्ति।

2. अधोलिखितपंक्तीः कः कं प्रति कथयति

| | कः कथयति | कं प्रति च कथयति |
|---|---|---|
| (क) भवान् तदर्थं क्षमस्व नः अपराधम्। | ...................... | ...................... |
| (ख) यदि भवन्तः अस्मत्प्रियम् इच्छन्ति। | ...................... | ...................... |
| (ग) न मे रोचते जीवहिंसा। | ...................... | ...................... |
| (घ) अमूनि मांसानि शोणितानि च लोकस्य हितार्थमेवावधृतानि। | ...................... | ...................... |
| (ङ) नार्हति देवः प्रदानहर्षातिशयात् प्रजानाम् अनवेक्षितुं हिताहितम्। | ...................... | ...................... |

3. कोष्ठके दत्तनिर्देशानुसारम् उत्तरत

   (क) हिताहितम् अनवेक्षितुम् (तुमुन् प्रत्ययान्तंपदम् किम्?)

   (ख) वारयितुम् अर्हन्ति अत्रभवन्तः (रेखांकितपदे मूलधातुः कः?)

   (ग) सम्प्रति किं करवाणि? (रेखांकितपदस्य पर्यायपदम् किम्)

   (घ) भवताम् औदार्यं निशम्य इह समागताः। (रेखांकितपदे कः प्रत्ययः?)

   (ङ) अतिथयः भोजनेच्छया बहिः तिष्ठन्ति। (रेखांकितपदे का विभक्ति?)

   (च) निष्क्रम्य, प्रवेशय, प्रवेश्य, निशम्य (कस्मिन् पदे ल्यप् प्रत्ययः नास्ति?)

## 23.4 किम् अधिगतम्

- राजा मैत्रबलः बोधिसत्त्वः आसीत्।
- मैत्रबलः अहिंसाप्रियः करुणापरः परहितरतः अतिथिसेवकः च आसीत्।
- यक्षाः ब्राह्मणवेशधारिणः राक्षसाः आसन्।
- मैत्रबलस्य महता त्यागेन तेषां हृदयम् परिवर्तितम्।
- ते मैत्रबलं मांसभक्षण–परित्यागस्य प्रतिज्ञां कुर्वन्ति।
- बहुव्रीहिसमासे अन्यपदस्य प्रधानता भवति तस्मै च अर्थानुसारम् 'तत्' इति सर्वनाम प्रयुज्यते।
- 'तव्यत्' प्रत्ययः धातुना सह युज्यते। अस्य प्रयोगे कर्तरि तृतीया कर्मणि प्रथमा भवति। अस्य रूपाणि त्रिषुलिङ्गेषु भवन्ति।

## 23.5 योग्यताविस्तारः

### (क) कवि–ग्रन्थपरिचयः

'हृदयपरिवर्तनम्' नाम्नः एकांकिनाटकस्य एषा कथा मैत्रीबलजातकात् गृहीता सम्पादिता च। अस्य जातकस्य रचयिता महाकविः आर्यशूरः यस्य समयः तृतीया ख्रीष्टाब्दी निर्णीयते विद्वद्भिः। मूलपुस्तके क्रमेण एतानि एकादशजातकानि 3, 4, 8, 10, 12, 14, 15, 16, 19, 31 सन्ति। अस्य मुद्रणम् 1891 ईश्वीयवर्षे अमेरिकादेशान्तर्गत–हार्वर्ड विश्वविद्यालयद्वारा अभवत्। अत्र उपनिबद्धाः सर्वाः कथाः प्रायेण पालिभाषायाम् लिखित–पिटकग्रन्थेभ्यः जातकग्रन्थेभ्यः च संगृह्य आर्यशूरेण संस्कृतभाषायाम् अनूदिताः सन्ति। इयं जातकमाला पंचतंत्रादिवत् उपदेशप्रधानकथावस्तुघटितः प्रबन्धो वर्तते। चम्पूकाव्यवत् एषा अपि रचना गद्य–पद्यमयी अस्ति। परम् अस्याः भाषा सरसा, सरला मनोहारिणी च वर्तते।

### (ख) भावविस्तारः

एतासु जातककथासु बोधिसत्त्वस्य उदारता–वीरता–अहिंसा–दानादिगुणानाम् कथारूपेण मनोहरं प्रेरकं च वर्णनं विद्यते। सर्वाः कथाः बोधिसत्त्वस्य तेषु जन्मान्तरेषु तं तं लोकोपकारवृत्तं श्रावयन्ति समुपदिशन्ति च मानवान् विशेषतः बालकान् सत्कर्मणां सदाचारशीलतायाः च। मैत्रीबलजातके मैत्रबलस्य मैत्रीभावनायाः ईदृशः परिणामोऽभवत्, येन यक्षाः राक्षसाः अपि तेषु आक्रमणं कर्त्तुम् समर्थाः नासन्। अपितु तस्य राज्ञः त्यागभावनां दृष्ट्वा तेषा यक्षाणाम् अपि हृदयपरिवर्तनम् अभवत्। यस्मिन् राष्ट्रे, समाजे, परिवारे, वा सौमनस्यं सद्भावना च विराजते तत्र सुखं, शान्तिः समृद्धिः च विलसन्ति।

(i) लोकानुरञ्जन / लोक कल्याणम्

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।

(ii) परोपकारः

आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा (उत्तररामचरितम्)

(iii) परोपकाराय सतां विभूतयः।

(क) अतिथिदेवो भव।

(ख) सर्वेषामभ्यागतो गुरुः।

(iv) अहिंसा – अहिंसा परमो धर्मः।

**भाषिकविस्तारः**

**उपपदविभक्तिप्रयोगः**

(i) न मे रोचते जीवहिंसा। 'रुच्' धातुयोगे चतुर्थी विभक्तेः प्रयोगः भवति। अतः 'मे' इत्यत्र चतुर्थी विभक्तिः अस्ति।

(ii) दास्यामि 'दा' योगेऽपि चतुर्थी विभक्तिः प्रयुज्यते।

(iii) 'अलं' योगे तृतीया विभक्तिः भवति। यथा हि– अलं विवादेन, कोलाहलेन, कलहेन।

## 23.6 पाठान्तप्रश्नाः

1. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत

(क) वनप्रदेशः कीदृशः आसीत्?

(ख) तृतीयः यक्षः उच्चैः प्रहसन् किं कथयति?

(ग) वंशीं कः ध्वनति?

(घ) गोपालकः मैत्रबलस्य कान् गुणान् वर्णयति?

(ङ) द्वारदेशे के तिष्ठन्ति?

(च) ब्राह्मणाः राजोचितं भोजनम् दृष्ट्वा किं कथयन्ति?

(छ) यक्षाणां हृदयपरिवर्तनम् कथम् जायते?

2. राजा मैत्रबलः किं किं त्यक्तुं यक्षान् अकथयत्? इति चतुर्वाक्येषु लिखत।

3. 'हृदयपरिवर्तनम्' नाट्यांशस्य सारं पञ्चवाक्येषु लिखत।

4. अधोलिखितवाक्यांशाः केषां चारित्रिकं वैशिष्ट्यं प्रकटयन्ति?

(क) परमकारुणिकः अस्ति। यक्षाणाम्/नृपस्य मैत्रबलस्य

(ख) वने स्वेच्छया विहरन्ति। यक्षाणाम्/मैत्रबलस्य

(ग) ते दीर्घाकाराः सन्ति। यक्षाणाम्/मैत्रबलस्य

(घ) मैत्री एव तस्य बलम्। यक्षाणाम्/मैत्रबलस्य

(ङ) कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः। यक्षाणाम्/मैत्रबलस्य

(च) मांसरुधिरमेव अस्माकं प्रियभोजनम्। यक्षाणाम्/मैत्रबलस्य

5. अधः वाक्येषु रेखांकितपदानां विग्रहं कुरुत

(क) यथेच्छम् पेयम् भोज्यं च लप्स्यध्वे।

(ख) राजा च अक्षतदेहः विराजते।

(ग) रुष्टेन यक्षेश्वरेण वयं राज्यात् निर्वासिताः।

(घ) तस्य सैन्यसंघटनम् आचाररक्षणार्थमेव।

(ङ) पंचपथिकाः भोजनेच्छया द्वारदेशे तिष्ठन्ति।

(च) स्वहितमपि अपश्यद्भिः।

6. अधोलिखितेषु वाक्येषु निर्दिष्टधातुना सह 'तव्यत्' प्रत्ययस्य प्रयोगं कुरुत

(क) युष्माभिः प्राणिहिंसा न ............................ (कृ)

(ख) त्वया यथेच्छं भोजनं ................................ (भुज्)

(ग) परद्रव्यलोभः न ................................ (कृ)

(घ) सदा सत्यं ................................ (वच्)

(ङ) मया नित्यं पाठः ................................ (स्मृ)

7. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

(i) धनिकः निर्धनेभ्यः धनं .................. । (दा–लट्)

(ii) सर्वे जनाः पीडितानां साहाय्यार्थं धनं .................. । (दा–विधिलिङ्)

(iii) अहं छात्रेभ्यः पुस्तकानि .................. । (दा–लृट्)

(iv) राजा विज्ञातदोषेषु दण्डं .................. । (धा–लट्)

(v) संपद्विनिमयेन उभौ राजानौ राज्यद्वयम् .................. । (धा–लङ्)

## 23.7 उत्तराणि

**23.3 बोधप्रश्नाः**

1. (क) v, (ख) iv, (ग) i, (घ) ii, (ङ) iii
2. (i) आशङ्कितः (ii) विचरन् (iii) भीतिम् (iv) अतिथीनाम्
   (v) आहूयन्ताम् (vi) स्प्रक्ष्यामः
3. (क) चतुर्थः (ख) प्रथमः (ग) गोपालकः (घ) यक्षाः (ङ) राजा

**पाठगतप्रश्नाः**

**23.1** 1. (क) ब्राह्मणवेशाः (ख) श्वापदभूयिष्ठः (ग) धेनूनाम् (घ) वटतरुतले (ङ) शाकभोजिनां

2. (क) v, (ख) iv, (ग) i, (घ) ii, (ङ) iii

3. (क) विपिनम् (ख) धेनवः (ग) सूर्यः (घ) कठिनम् (ङ) बहवः (च) समयः

**23.2** 1. (क) कस्य (ख) केषु (ग) किम् (घ) काम् (ङ) कैः

2. (क) धृतमैत्रीभावः (ख) निर्भयाः (ग) जितेन्द्रियगणः (घ) मैत्रीबलः

3. (क) बलं (ख) वंशी (ग) यथार्थं (घ) अरण्यदर्शनाय (ङ) निर्भयाः

**23.3** 1. (क) × (ख) ✓ (ग) × (घ) × (ङ) ✓

2.

| कः | कं |
|---|---|
| (क) पञ्चयक्षाः | – राजानं मैत्रबलं प्रति |
| (ख) राजा मैत्रबलः | – पञ्चयक्षान् प्रति |
| (ग) राजा मैत्रबलः | – आत्मानं प्रति |
| (घ) मैत्रबलः | – मन्त्रिणं प्रति |
| (ङ) मन्त्री | – राजानं प्रति |

3. (क) अनवेक्षितुम् (ख) अर्ह् (ग) अधुना (घ) ल्यप् (ङ) तृतीया एकवचनम् (च) प्रवेशय

**23.6 पाठान्तप्रश्नाः**

1. (क) वनप्रदेशः श्वापदभूयिष्ठः आसीत्।

   (ख) तृतीयः यक्षः उच्चैः प्रहसन् कथयति– "शाकभोजिनां कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः।

   (ग) वंशी कश्चित् युवा ध्वनति।

   (घ) सः राजा मृदुभाषी अस्ति, सः कदापि क्रोधं न करोति, मैत्री एव बलं तस्य, सः प्रजापालकः इति गुणान् वर्णयति।





(ङ) द्वारदेशे यक्षाः तिष्ठन्ति।

(च) ब्राह्मणाः राजोचितं भोजनं दृष्ट्वा कथयन्ति यत् मांसम् रुधिरमेव तेषां प्रियं भोजनम्

(छ) राज्ञः त्यागेन यक्षाणां हृदयपरिवर्तनं भवति।

2. स्वेच्छया चतुर्वाक्यानि लिखत।
3. स्वेच्छया पञ्च वाक्यानि लिखत।
4. (क) नृपस्य मैत्रबलस्य (ख) यक्षाणाम् (ग) यक्षाणाम्

   (घ) नृपस्य (ङ) यक्षाणाम् (च) यक्षाणाम्
5. पाठात् एव लिखत।
6. (क) कर्त्तव्या

   (ख) भोक्तव्यम्

   (ग) कर्त्तव्यः

   (घ) वक्तव्यम्

   (ङ) स्मर्तव्यः
7. (i) ददाति अथवा दत्ते

   (ii) दद्युः अथवा ददीरन्

   (iii) दास्यामि अथवा दास्ये

   (iv) दधाति अथवा धत्ते

   (v) अधत्ताम् अथवा अदधताम्